This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशाय नमः।। कासारतीरसरसीरुहसारदानः शुभ्र[illegible]भ्रमरमध्यमिवेंदुबिंबं।
विभ्रत्पुरश्चिरतरं भवतः सपायात्सजातनिर्मलजलश्रीतिबद्धनमः।।१।। अभिवंद्य शिवं धीर
धीरद्धेयारिणं च वरणवृतं।। प्रमाणमंजरीसर्वदेवेन क्रियते मया।।२।। अभिधेयः पदा
१ र्थः।। सभावाभावभेदाद्द्विधा। पूर्वो विविधविषयः।। स षोढा द्रव्यादिभेदेन। तत्र स ५
मवायीकारणं द्रव्यं।। तन्नवधा पृथिव्यादिभेदेन।। तत्र गंधवती पृथिवी।।
सा द्वेधा नित्यानित्यभेदेन। पूर्वा परमाणुरूपा। क्रियावान्नित्यः परमाणुरिति
सामान्यलक्षणं। परमाणुर्गंधवान् पार्थिवपरमाणुः।। उत्तरा द्वेधा नित्यसमवेता
न्यथा चेति। पूर्वा द्व्यणुकं। स्पर्शवान्नित्यसमवेतं द्व्यणुकमिति सामान्यलक्ष
णं। गंधवद् द्व्यणुकं पार्थिवद्व्यणुकं।। पृथिवीत्वं नित्यसमवेतत्वमिति घटपदज्ञा

निहात्सत्तावदिति परमाणुद्व्यणुकयोः सिद्धिः।। उत्तरा त्रेधा शरीरादिभेदेन।। स्पर्शवदिंद्रि
यसंयुक्तमेव भोगसाधनं शरीरमिति सामान्यलक्षणं।। गंधवच्छरीरं पार्थिवशरीरं।
स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोगः। तद्द्वेधा योनिजायोनिजभेदेन।।
पूर्वमस्मदादीनां प्रत्यक्षसिद्धं।। उत्तरं च द्वेधा। प्रकृष्टधर्मज न्यथा चेति।। पार्थिवाः
परमाणवः पारंपर्येण कदाचित्प्रकृष्टधर्मजायोनिजशरीरारंभकाः।। स्पर्शवत्पर
माणुत्वात् उदकपरमाणुवदिति अयोनिजशरीरसिद्धिः।। दुःखभूयस्त्वादधर्मज
मुत्तरं तत्र मशकादीनां प्रत्यक्षसिद्धं तस्यायोनिजत्वं।। षड्गुणमप्रत्यक्षं साक्षात्कारशक्ती
तिसाधनमिंद्रियमिति सामान्यलक्षणं। गंधवदिंद्रियं घ्राणं। तत्र प्रमाणं। पार्थि
वाः परमाणवः पारंपर्येणेंद्रियारंभकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति।।

१

Accession No:- ~~1295~~ M820

Title- प्रमाणमञ्जरी

Author:- सर्वदेव तार्किकचक्रचूडामणि

Subject:- न्याय

Folios:- 16

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-820
Dist Nagpur

स्पर्शोवान् शरीरेंद्रियव्यतिरिक्तः कार्यजातो वि षय इति सामान्यलक्षणं ॥ गंधवान्विषयः
पार्थिवो विषयः ॥ इष्टकादिजन्यस्य सिद्धिः ॥ सा चतुर्दशगुणवती ॥ एवं तु तत्तत्र सामान्यलक्ष
णानुगमेनोपदान्तरानुगमेन तत्तत्परमाण्वादीनां लक्षणानि भवंति ॥ स्नेहवदंभः ॥ तद्द्विवि
धं ॥ नित्यमनित्यं च ॥ पूर्वं परमाणुः ॥ उत्तरं च द्व्याद्यनित्यसमवेतमन्यथा चेति ॥ पूर्वं द्व्यणु ॥
२ कं जलत्वं नित्यसमवेतवृत्ति सरित्समुद्रजातित्वात्सत्तावदिति परमाणुद्व्यणुकयोः सिद्धिः ॥
उत्तरं शरीरादिभेदेन त्रेधा ॥ शरीरे प्रमाणं ॥ आप्याः परमाणवः पारंपर्येण कदाचिच्छ
रीरारंभकाः स्पर्शवत्परमाणुत्वात्पृथिवीपरमाणुवदिति ॥ तच्च शुक्रशोणितसंनि
पातनिरपेक्षं नाप्यकार्यत्वात्करकावदिति ॥ तत्स्पर्शादृष्टजं चायोनिजशरीरत्वात्
मशकादिवदिति ॥ [illegible] ॥ इंद्रियं रसनं ॥ आप्याः — परमाणवः

पारंपर्येणेंद्रियारंभकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति तत्र प्रमाणं ॥ उत्तरो
विषयः सरिदादिः रूपादिचतुर्दशगुणवान् ॥ अगुरुत्वे सति रूपवत्तेजः ॥ तन्नित्यानि
त्यभेदेन द्वेधा ॥ आद्यं परमाणुः उत्तरं द्वेधा नित्यानित्यसमवायात् आद्यं द्व्यणुकं ॥
तेजस्त्वं नित्यसमवेतवृत्ति दीपसुवर्णजातित्वात्सत्तावदिति परमाणुद्व्यणुकयोः सि
द्धिः ॥ नासिद्धं साधनं ॥ तेजस्त्वं सुवर्णवृत्ति दीपाणुजातित्वात्सत्तावदिति साधनात् ॥
उत्तरं शरीरादिभेदेन त्रेधा ॥ पूर्वं च प्रमाणं ॥ तैजसाः परमाणवः पारंपर्येण शरीरा
रंभकाः स्पर्शवत्परमाणुत्वात्पृथिवीपरमाणुवदिति ॥ तदयोनिजमेव तेजः कार्य
त्वात् दीपवत् ॥ नयनाख्यं तैजसेंद्रियं तच्च प्रमाणं ॥ आलोकासत्ताभावे जायमानो
रूपसाक्षात्कारस्तेजःकारणकः रूपसाक्षात्कारत्वात्संमतालोके जायमानरूपसा

2

साक्षात्कारवत्त्वात्॥ नतोलकरूप्यं। नश्यानोन्मीलने सत्येवोपलब्धेः। आलोकाज्ञानं तम
इत्याश्रयासिद्धिरिति चेत्॥ नाविधिमुखे नस्यात् नञेण दृष्टारोपेण बहीरूपतयाप्रती
तेः॥ अतएव नालोकाभावः। आलोकाभाव स्तमइति वदतोपि मते॥ आरोपितनील
रूपप्रतीतेः सत्त्वान्नाश्रयासिद्धिः॥ तमेन भावरूपं असत्येवालोके चक्षुषाप्रतीयमा
नत्वात्। आलोकाभाववदिति प्रमाणोपपत्तेः। रूपवत्तमो द्रव्यमिति वदतो मते
रूपप्रतीतेश्च सत्त्वान्नाश्रयासिद्धिः॥ तदतिरिक्तो विषयो नास्त्यादिः। रूपाद्येकदेशानु । ३ ।
एवत्। रूपासहचरितस्पर्शवान् वायुः। सनित्यानित्यभेदभिन्नः। नित्यः परमाणुः।
उत्तरो द्वेधा। त्रिप्समवेतोन्यथा चेति। आद्यो द्व्यणुकं। वायुत्वं नित्यसमवे
तत्त्वातिस्पर्शवज्जन्यद्रव्यत्वावान्तरजाति स्यात् पृथिवीत्वादिति परमाणुद्व

णुकयोः सिद्धिः॥ उत्तरः शारीरादिभेदेन त्रेधा भिद्यते॥ वायुपरमाणवः पारंपर्येण शारी
रारंभकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति॥ शरीरसिद्धिः। तद्योनिजं वायुका
र्येषा ट त्वगिंद्रियवत्॥ वायुपरमाणवः पारंपर्येणेंद्रियारंभकाः स्पर्शवत्परमाणुत्वा
त्तेजःपरमाणुवदिति॥ त्वगिंद्रियसिद्धिः॥ तदन्यो विषयः॥ त्वगिंद्रियं अतपि द्र
व्यग्राहकं आ रूपि ते सति द्रव्यग्राहकेंद्रियत्वात् मनोवदिति॥ वायोः प्रत्यक्षत्वासि
द्धिरिति चेत्॥ नात्मत्वे सति सदा स्पर्शवत्त्वस्योपाधित्वात्॥ विप्रतिपन्नो वायुर
प्रत्यक्षः। वायुत्वात्त्वगिंद्रियवत्॥ (४)। स्पर्शादिनवगुणवान्। शब्दवदाकाशं तत्र प्र
माणं शब्दोऽष्टद्रव्यातिरिक्तसमवेतः सत्त्वे सति श्रोत्रग्राह्यत्वात् शब्दवदिति॥
विप्रतिपन्नाः शब्दाः श्रूयमाणद्व्याश्रयाश्रयाः शब्दत्वात् श्रूयमाणशब्दवदिति ये

3

कत्वासिद्धं॥ आकाशं नित्यं असमवेतभावत्वात् समवायवत्। इति नित्यत्वं सिद्धं। तदेवे
द्रियं श्रोत्रं नाम। शब्दोपलब्धिर्भूतेन्द्रियकरणिका रूपशब्दयोरन्यतरसाक्षात्का
रत्वात् रूपसाक्षात्कारवदिति पारिशेष्यात्सिद्धं॥ परिशेषस्तु विप्रतिपन्नाः शरीरस
द्वयवानयनादयः तद्ग्राहकवान्न भवन्ति। कार्यत्वात् घटवदिति॥ न कालादयस्त
द्ग्राहकाः अजसंयोगनिराकरणात्। शब्दादिषड्गुणवत्॥ विवक्षितपरत्वासमवाय्या
श्रयत्वे सति सर्वगतः शब्दः। विप्रतिपन्नं मनो विवक्षितपरत्वासमवाय्याश्रयसं ४
युक्तद्रव्यत्वादात्मवदिति। तत्र प्रमाणं। अनियतपरत्वासमवाय्याश्रयत्वे सति सर्व
गतादिद्धं॥ विप्रतिपन्नं मनो नियतपरत्वासमवाय्याश्रयत्वे संयुक्तद्रव्यत्वादात्मव
त्ति

दिति तत्र प्रमाणं। मनसा संयुक्तं मनः सर्वदा विशेषगुणरहितद्रव्यद्वयसंयुक्तं द्रव्यत्वा
दात्मवदिति दिक्कालयोः प्रमाणं। अत्र द्वाविनये कल्पितेन्यत्रापि नैव व्यवहारसिद्धे
रस्तेन कल्पनाया प्रमाणाभावः। दिक्कालौ द्रव्यत्वावान्तरजातिरहितौ बुद्ध्यनाधारत्वे
सति सर्वगतत्वादाकाशवदिति विभुत्वसिद्धं॥ विप्रतिपन्नं सर्वकार्यं दिक्कालका
र्यं कार्यत्वात् संप्रतिपन्नवदिति तयोः सर्वकार्यनिमित्तत्वं। आकाशकालदिश
सर्वगताः तयोर्व्यतिरिक्तत्वे सति स्पर्शरहितद्रव्यत्वादात्मवदिति सर्वगतत्वं। स
ङ्ख्यादिपञ्चगुणवत्त्वं कालदिशोः॥ बुध्याश्रय आत्मा॥ स द्वेधा। ज्ञानीशभेदा
त्। प[illegible]त्रप्रमाणं। आत्मत्वं नित्यविशेषगुणवद्वृत्ति व्याप्यजातित्वात् सत्ता

विप्रतिपन्नं सर्वं कार्यं विवक्षितज्ञानजं कार्यत्वात्संप्रतिपन्नकार्यवदिति सत्ते तद्धेतु
त्वं सिद्धं तस्य। तत्र ज्ञानस्याश्रयव्यापि नित्यगुणत्वान्न परमाणुगुणत्वं वा दिक्सा
श्रयव्यापित्तज्ञानस्यासिद्धं। अत एव नादिव्यापकयत्ना या श्रयव्यापिनौ। ठ
त्तरात्र प्रमाणं॥ भोगः क्वचिदाश्रितः गुणत्वाद्रूपवदिति॥ न कार्याणि तद्धेति। का ।५।
र्यत्वात्पटवदिति॥ नश्वोत्रादिनि तद्धेति॥ करणत्वाद्दंडवदिति॥ भोगो गुणः। अनित्यत्वे
सत्यचाक्षुषप्रत्यक्षत्वाच्छब्दवदिति हेतुसिद्धिः॥ असमवायासाद्द्रव्यस्यावांतर
जातिमान्न चतुर्दशगुणवत्वात्साथोवदिति। आत्मत्वादौ नेकवाचकाः। आत्म

वाचकत्वात्सनत्रादवदिति नानात्वं॥ मच्छरीरेतराणि मत्तानि मदात्मसंयुंजि मत्तेत्या
मच्छरीरवदिति सर्वगतत्वं तस्य॥ इच्छोपि सर्वगतः आत्मत्वाद्देहिवदिति। सोनित्यः
सर्वगतत्वात्। कालवत्॥ स च व्यापि चतुर्दशगुणवान्॥ मत्तेत्ये सति सर्वदा
स्पर्शाभ्यन्यमनः। सुखज्ञानमिंद्रियजं ज्ञानत्वाद्रूपज्ञानवदिति तत्र प्रमाणं॥
मनो गुणु आत्मसंयोगित्वे सति निरवयवत्वात्परमाणुवदिति मत्तेसंतस्यासिद्धं॥
अजसंयोगनिराकरणात्तु न सर्वगते न व्यभिचारः। संख्यादिष्टौ गुणः॥ इति तार्कि च
कचक्रचूडामणिसर्वदेवसूरिभिर्विरचितायां प्रमाणमंजर्यां द्रव्यपदार्थः॥
कर्मान्यत्वे सति सामान्यैकाश्रयो गुणः। स रूपादिभेदेन चतुर्विंशतिधा॥ नयनै
कग्राह्यमहड [illegible] जातिमत्तरूपं॥ रसनैकग्राह्यमानरसः॥ [illegible] घ्राणैकग्राह्यजाति

मात्रगंधः ॥ [illegible]शो नैव गंधः २ सजातिमान्स्पर्शः ॥ एते यावद्द्रव्यभाव्या यावद्द्रव्यभा
विभेदा[illegible]द्विधा ॥ पार्थिवपरमाणोरन्यत्र यावद्द्रव्यभाविनः ॥ प्रत्यक्षद्रव्ये प्रत्य
क्षतस्तथासिद्धः ॥ द्व्यणुकादिषु यावद्द्रव्यभाविनः ३ ॥ सलिलादिरूपादित्वात् संप्र
तिपन्नवदिति ॥ पार्थिवपरमाणुषु अयावद्द्रव्यभाविनः ३ ॥ कार्यरूपादित्वात् घट
रूपादिवदिति । सलिलादिपरमाणुरूपादयो यावद्द्रव्यभाविनः ४ । तत्र प्र
माणं । पार्थिवपरमाणोः सति रूपादयो निवर्तन्ते अनित्यत्वात् संप्रतिपन्नवदिति ।
पार्थिवं द्व्यणुकं । अनित्यविशेषगुणवत् समवेतं पार्थिवकार्यत्वात् घटव
दिति नासिद्धं साधनं ॥ हुतवहनिवहालीढे महीस्पंडे पूर्वरूपाविलक्षण

द्वि

रूपादिलक्षणस्य दर्शनात् ॥ न चैवं कल्पनेनातिप्रसंगः ॥ तत्र पार्थिवपरमाणुरग्नि
संयोगासमवायिकारणविशेषगुणवान् अनित्यविशेषगुणवत्त्वे सति नित्यभूत
त्वादाकाशवदिति ॥ पाकजत्वं तेषां सिद्धं ॥ गुणत्वावांतरजात्या द्व्यणुकपरिमाण
समवायिकारणसजातीया संख्या ॥ सा द्वेधा ॥ अयावद्द्रव्यभावि यावद्द्रव्यभावि
भेदात् ॥ एवं च प्रमाणं ॥ परिमाणत्वं संयोगातिरिक्तानेकद्रव्यासमवायिकारण
वृत्ति । परिमाणजातित्वात् सत्तावदिति ॥ परमाणुपरिमाणमसमवायिकारणं न
भवति ॥ नित्यपरिमाणत्वादाकाशपरिमाणवदिति ॥ परपक्षव्युदासः ॥ द्वित्व
मयावद्द्रव्यभावि अनेकगुणत्वात् संयोगवत् ॥ द्वित्वसामान्यं बुद्धिजन्यवृत्ति द्वित्व
जातित्वात् स[illegible]वदिति बुद्धिजन्यं ॥ उत्तरत्र प्रमाणं ॥ संख्या[illegible]त्वं यावद्द्रव्यभावि

वृत्ति।। द्वित्वत्वं च जातित्वात्सत्तावदिति।। तदेवैकत्वं। स णः सामान्यैकाश्रय
त्वे सति अ द्रूपवदिति।। परपक्षव्युदासः।। एवं अनन्ताय । संख्यायाः पदार्थान्त
रत्वे स्वी तैरुपमेपि पदार्थान्तरं भवेत्।। गुणत्वावान्तरजासा पृथक्त्वान्या प्रत्य
क्षात्मगतयायाच द्रव्यभावि सजातीयपरिमाणं। आत्मा पृथक्त्वान्या प्रत्यक्षयाच
द्रव्यभाविगुणायान् सर्वगतत्वाद्दिग्वत्।। सर्वद्रव्यपरिमाणाधिकारणं द्र
व्यत्वादात्मवदिति।। तच्चतुर्विधं। अणुमहद्दीर्घह्रस्वभेदात्।। द्व्यणुकेऽणु
त्वमंगीकृत्य ह्रस्वत्वनिराकुर्वाणं प्रतीदमनुमानं। द्व्यणुकमणुपरिमाणाति
रिक्तपरिमाणाधिकरणं कार्यद्रव्यत्वात् घटवदिति। घटे महत्त्वमंगीकृत्य दी
र्घत्वमंगीकुर्वाणं प्रतीदमनुमानं। घटो महत्त्वव्यतिरिक्तपरिमाणाधिकर

णं।। कार्यद्रव्यत्वाद्द्व्यणुकवदिति।। ।। संख्यातिरिक्तादेकमात्रगतान्यंतरं सजातीयं
पृथक्त्वं। तच्च द्वेधा।। यावद्द्रव्यभाव्ययावद्द्रव्यभाविभेदात्।। आद्यः संख्यातिरि
क्तदिगातगुणवारद्रव्यत्वात्घटवदिति। अयावद्द्रव्यभाविपृथक्त्वविधिः।
पृथक्त्वसामान्यमस्मदादिबुद्धिसत्वाति पृथक्त्वजातित्वात्। सत्तावदिति बुद्धिम
त्वंसिद्धं।। तत्सामान्यं कारणगुणपूर्ववृत्ति पृथक्त्वजातित्वात्सत्तावदिति। तत्साम
न्यं यावद्द्रव्यभाविवृत्ति तज्जातित्वात् सत्तावदिति एकपृथक्त्वसिद्धिः।। ।। गुणत्वा
वांतरजात्या द्रव्यासमवायिकारणसजातीयः संयोगः तत्र प्रमाणं।। संयोगपदसत्
वाच्यं।। व त्वन्तरस्य लक्षणपदवदिति।। परित्वोषात्।। सत्त्वेपि चान्यतरकर्मजो
भयकर्मज योगजभेदात्।। तत्रोभयप्रसिद्धं।। येप्रमाणं।। संयोगाहं
२ स्व

संयोगासमवायिकारणवृत्तिसंयोगसमवेतत्वात्सत्ताव[illegible]विप्रतिपन्ना आत्मा
दयः आका[illegible]न संयुंज्यते सर्वगतत्वादाकाशवदिति। अजसंयोगनिरासः।
अयं। यद्द्रव्यभावित्वं तस्य प्रत्यक्षसिद्धं।। संयोगविरोधी गुणो विभागः। तत्र
२८ प्रमाणं। आकाशः संयोगातिरिक्तकर्मजगुणाधारः द्रव्यत्वात् शरीरवदिति।। वि
प्रतिपन्नं सर्वद्रव्यं विभागवत् द्रव्यत्वादाकाशवदिति। स द्वेधा कर्मजविभाग
जभेदात्। आद्यो द्वेधा। अन्यतरकर्मज उभयकर्मजभेदात्। तत्र प्रमाणं।
विभागस्यैकानेककर्मासमवायिकारणवृत्ति। विभागजातित्वात्संभावदि
ति।। विभागजविभागसिद्धिः परिशेषात्। विभागत्वं विभागासमवायिवृत्तिका
रणवृत्ति विभागजातित्वात्सत्तावदिति।। वानुमानं। परव्यवहारे यद्विशेष

णतया निमित्तं तत्परत्वं।। अपरव्यवहारे यद्विशेषणतया निमित्तं तदपरत्वं।।
तत्र प्रमाणं। घटोस्मदादिबुद्धिजैकद्रव्यजातीयवान्।। अनेकविशेषगुणसम
वायिकारणत्वादात्मवदिति।। विप्रतिपन्नपरत्वादिसंयोगासमवायिका
रणकं अस्मदादिबुद्धिजैकद्रव्यत्वात् सुखवत्।। परिशेषाद्दिक्कालपि
डसंयोगासमवायिकारणत्वं सिद्धमनयोः।। अर्थावग्रहो बुद्धिः। सा
द्वेधा नित्यानित्यभेदात् ——।। रूर्णं भगवद्बुद्धा तो महेश्वरस्य।
सा परीक्षितास्मदव[illegible]रणे उत्तराप्यनीशानां न सप्रत्यक्षा सिद्धा।
साद्वेधा [illegible] विद्याविद्याभेदात्।। बाधीता धीः अविद्या।। साद्वेधा नि

पद[illegible]तेषु अव्याप्तिविषयत्वात् सम्यग्ज्ञत्वादिति। उत्तरः संशयः। इदम
होस्विन्नैवमिति व्यवहारो व्यवहार्ये ज्ञानपूर्वकः॥ व्यवहारत्वात् संप्रति
पन्नवदिति। तत्र प्रमाणं। अन्यध्यवसायस्योहान्तर्भावः। स्वप्नस्यापि विप
र्यये॥ अबाधिता धीर्विद्या। सा द्वेधा। प्रमितिरन्यथा चेति॥ सम्यग
नुभूतिः प्रमितिः। सा द्वेधा। प्रत्यक्षेतरा चेति। अपरोक्षा सा प्रत्यक्षा। इत
रा सा परोक्षा। पूर्वेयं द्वेधा। प्रकृष्टधर्मजेतरभेदात् इर्वायोगिप्रत्य
क्षं। तत्र प्रमाणं॥ धर्मः कस्यचित् प्रत्यक्षः प्रमेयत्वात् दासीवत्॥ यस्य

सः प्रत्यक्षः स योगी। उत्तरास्मदादीनां प्रत्यक्षा। सापि प्रकारांतरेण द्वेधा। स
विकल्पकनिर्विकल्पकभेदात्॥ विशिष्टविषयं निर्विकल्पकं। तत्र प्रमाणं।
स्मृतिव्यतिरिक्तत्वे सति अबाधितबुद्धित्वात् निर्विकल्पकाभवदिति॥ वस्तुस्व
रूपमात्रावभासकं निर्विकल्पकं॥ ज्ञानानां सविकल्पकत्वात् दृष्टान्तासिद्ध
द्धिरिति चेत्। तत्र प्रमाणोपपत्तेः। सर्वे विकल्प~~[illegible]~~ज्ञानव्याप्याजा जा
तिमतः जातिमत्वात् घटवदिति। (७) उत्तरा लैंगिकी। लिंगं पुनः साध्यव्यभिचा
रित्वे सति पक्षधर्मतायुतं। तत् द्वेधाभिधते। अन्वयिव्यतिरेकिभेदात्॥
यस्य [illegible]ध्येन साहचर्यनियमस्तदन्वयि॥ सा विपक्षे नास्तीति च। पूर्वमन्वय
व्यतिरे[illegible]। तद्यथा। निनदो निसः॥ × नद्धप + प[illegible]रुत्वाद्येवं न देवं यथा

रथः तथ[illegible]येदं तस्मात्तथा ॥ उक्तकेवलान्वयि ॥ यथा [illegible]रतस्वापकः कस्यचि
त्प्रत्य[illegible]क्षः ॥ प्रमेयत्वात् यदेवं तदेवं यथा पृथिवी ॥ तथा च प्रमेयं लक्षं तस्मात्तथा ॥
असत्ति सपक्षे यस्य साध्याभावेऽभावनियमस्स व्यतिरेकी ॥ यथा ॥ सर्वं कार्यं
सर्ववित्कर्तृकं कार्यत्वात् यदेवं न तदेवं यथा परमाणुर्न च नेदं तथा तस्मा
न्न तथा ॥ लिंगलक्षणरहिता लिंगाभिमानविषया लिंगाभासाः ॥ ते चासि
द्धविरुद्धानैकान्तिकानध्यवसितबाधितविषयसत्प्रतिपक्षभेदात् षट्प्र
काराः ॥ पक्षधर्मतयाऽज्ञातोऽसिद्धः ॥ यथा शब्दो नित्यः चाक्षुषत्वात् ॥ पक्ष
विपक्षयोरेव वर्तमानो विरुद्धः ॥ यथाऽनित्यः शब्दः श्रोत्रग्राह्यत्वादिति
पक्षत्रयवृत्तिरनैकान्तिकः ॥ यथा शब्दो नित्यः प्रमेयत्वादिति ॥ सपक्षविपक्ष
व्यावृत्तः पक्षे वर्तमानोऽनध्यवसितः ॥ यथा पृथिवी नित्या गंधवत्वादिति ॥ प्रमाणवि
रोधेन बाधितविषयः कालात्ययापदिष्टः ॥ यथा जलु घ्रोग्निः प्रमेयत्वादिति ॥ समबल
स्तुक्ष्माविरुद्धहेतुद्वयसमावेशः सत्प्रतिपक्षः ॥ यथा शब्दो नित्यः श्रोत्रग्राह्य
ताद्दस्तुत्तौ ॥ नानित्यः सामान्यवत्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वादिति घोटख
ब्युहः ॥ शेषं स्पष्टं ॥ वाक्याद्वाक्यार्थधीरसन्निहितविषये अभावधीरसंयोग
हेजीवतो बहिर्बुद्धिरनुमितिः ॥ व्रसपक्षेतरप्रतितित्वा संप्रतिपलवत् ॥ संजितिताव
ष्या अप्रमावप्रमापसपक्षजा अनुमितिरन्यप्रमितित्वात् संप्रतिपलत्वादिसत्तभार्थ्यचः ॥
शेष[illegible]ष्टं ॥ उत्तरा स्मृतिः ॥ साऽप्रमा स्वविषये पक्षधी[illegible]अनुमानान्यथाविद्युपर्वे
ययीदि [illegible] ॥ इति सिद्धाविद्या ॥ ॥ यस्मिन्न[illegible]प्रमाने नतत्साधने धीभि

पंगास्म[illegible]वं॥ यस्मिन्ननुभूयमाने तत्साधने बुद्धेः स[illegible]दुखं॥ तं बुद्धिजं॥ तद्-
न्वयव्यतिरेकानुविधायित्वाद्यदेवं यथा घट॥ तथा च प्रकृतं तस्मात्तथा॥ प्रार्थ-
नाइच्छा॥ सा द्वेधा॥ नित्यानित्यभेदेन॥ महेश्वरस्य नित्या॥ ईश्वरविशेषगुणत्वात्तत्
११॥ बुद्धिवत्॥ विप्रतिपन्नानि कार्याणि ईश्वरेच्छाजन्यानि कार्यत्वात् संप्रतिपन्नवदिति।
सर्वोस्मिन्निमित्तत्वमीशेच्छायाः॥ अनित्या जीवानां॥ अनित्यविशेषगुणत्वात् ॥७
तद्बुद्धिवत्॥ रोषो द्वेषः॥ सो नित्यः जीवविशेषगुणत्वात्तत्तद्बुद्धिवत्॥ बुद्धिज-
त्वं तदन्वयव्यतिरेकानुविधायित्वादिति॥ ॥ गुणत्वावान्तरजात्या बुद्धि इच्छान्ये-
श्वरविशेषगुणगतसामान्याभावः प्रयत्नः॥ सोऽस्मदादीनां प्रत्यक्षः ईश्वरस्य तु
पुतपक्षासिद्धः॥ स नित्यानित्यभेदाद्द्वेधा॥ नित्यः सर्वज्ञस्य॥ तद्विशेषगुणत्वा-

त्तद्बुद्धिवदिति॥ अनित्यो द्वेधा॥ इच्छाद्वेषान्यतरपूर्वकश्चेति॥ पूर्वो मानसप्रत्यक्ष-
सिद्धः॥ उत्तरोऽनुमानसिद्धः॥ सुप्तप्राणक्रियास्मदादिप्रयत्नजा प्राणक्रियात्वात् जाग्र-
त्प्राणक्रियावदिति॥ आद्यपतनासमवायिकारणं पतत्सजातीयं गुरुत्वं॥ तत्र प्रमाणं॥ प्रथ-
मपतनं असमवायिकारणपूर्वकं क्रियात्वात् संप्रतिपन्नकार्यवदिति॥ परिशेषात्तद्गुरुत्वमि- ॥
ह तत्सर्पिर्यावित्तद्द्रव्यभाव्यतीन्द्रियवत्॥ चक्षुर्दृग्गुणत्वात् बहुविशेषगुणत्वाद्धर्मवदि-
ति॥ अनुमानद्वयं॥ तत्राद्यस्यासंभवात्॥ घटगुरुत्वं यावद्द्रव्यभावि भिन्नक्रियाजन्य-
त्वे सति बुद्धिजन्यत्वे सति घटसमवेतत्वात् घटरूपवदिति॥ सर्वेषां गुरुत्वं यावद्द्र-
व्यभावि गुरुत्वात् घटगुरुत्ववदिति साधनीयं॥ अतएव कारणगुणपूर्वकत्वं तत्र
दृष्टांतेन सा[illegible]नीयं॥ घटगुरुत्वमप्रत्यक्षं गुरुत्वात् परमाणुगुरुत्ववदिति॥ ॥

११

आयस्यंदना[illegible]समवायिकारणासंततसजातीयं द्रवत्वं ।। तद्द्वि[illegible]नित्यानित्यभेदेन ।। सलि-
लपरमाणु[illegible]नित्यं । तत्रप्रमाणं । सलिलद्व्यणुकयावद्द्रव्यगाधिद्रवत्ववत्समवे-
तं समवायिकारणकार्यं ।। कार्यत्वे सति सलिलत्वात्तत्संप्रतिपन्नसलिलवदिति ।
पार्थिवतैजसपरमाणुद्रवत्वमनित्यं । असलिलद्रवत्वात् संप्रतिपन्नवदितीतरसि-
द्धिः ।। पार्थिवपरमाणवी रूपादिवत्तु ष्यपत्तिः विजाग्निसंयोगजैकद्रवत्वगुणयोगि-
न । अनित्यविशेषगुणवत्वे सति नित्यगतत्वात् सादाकाचावादिति ।। परिशेषाद्वह्निसं-
योगजत्वं द्रवत्वस्य सिद्धं ।। तेजःपरमाणुद्रवत्वमग्निसंयोगजं उदकानधिकर-
त्वे सति परमाणुद्रवत्वात् पार्थिवपरमाणुद्रवत्ववदिति । घनोपलगतद्वीन्द्रियग्रा-
ह्यविशेषगुणत्वात् ।। रूपवदिति ।। परगतविशेषानपेक्षपार्थिव्यादिना

गुणात्यंतसजातीयः स्नेहः ।। स च यावद्द्रव्यभावी अभोगिविशेषगुणः सजातीय

मन्यो व्यवच्छेदको गुणः विशेषगुणः ।। गुणत्वावांतरजात्या वेगसजातीयः संस्कारः । स त्रे-
धा वेगादिभेदेन ।। क्रियासमवायिकारणैकद्रव्यासंततसजातीयो वेगः । दीपत्वं क्रियासमवा-
यीकारणैकद्रव्यसमवायिकरणं । स्पर्शवज्जातित्वात्सत्तावदिति वेगसिद्धिः । स द्वेधा वेगज-
क्रियाजश्चेति । वेगत्वं वेगासमवायिकारणवृत्ति वेगजातित्वात्सत्तावदिति । वेगजसिद्धिः ।
वेगत्वं कर्मासमवायिकारणवृत्ति वेगजातित्वात्सत्तावदिति । कर्मजवेगसिद्धिः । यावद्द्रव्य-
भाविसंस्कारः स्थितिस्थापकः । सुवर्णयावद्द्रव्यभाव्यतीन्द्रियवात् घनायपव-
त्वात् सात्त्वावादितितत्सिद्धिः । संस्कारः पुरुषगुणो भावना । संस्कारत्वं पुरुषगुणाव्य-
ति स्थितिस्थापकवेगजातित्वात्सत्तावदिति भावनासिद्धिः । अतीन्द्रियः पुरुषैकवृत्तिः
सुखहेतुर्धर्मो [illegible] अतीन्द्रियपुरुषैकवृत्तिर्दुःखहेतुरधर्मः । तत्रप्रमाणं । विमतं सुखं द्रव्य

चलनं पुरुषप[illegible]कारितं क्रियात्वात् कलेवरचलनवदि[illegible]। श्रोत्रैकग्राह्यजातिमास्य
शब्दः । [illegible]स्य महाभूतविशेषगुणत्वात् घटरूपवदिति अनित्यत्वसिद्धिः । शब्दो
गुणः सामान्यैकाध्यक्षत्वे सति कर्मान्यत्वात् रूपवदिति ॥ नासिद्धो हेतुः । शब्दो नित्यः अपाक
जनित्यभूतविशेषगुणत्वात् सलिलपरमाणुरूपवदिति । अन्वयव्यतिरेकिणा सत्प्रति
पक्ष इति चेत् । नास्य दूषणस्य वचनीयता भावपक्षसिद्धान्तापातात् ॥ की । एकोयं व्यति
रेकोस्य हेतोः किं विपक्षे अभावो न्यो वा । नाद्यः ॥ अपसिद्धान्तप्रसंगात् ॥ अन्यश्चेद्द्वि
त्यवाच्यः ॥ द्वयं प्रतियोगिनिहितौ स्मर्यमाणे विपक्षोपलंभसत्तो व्यावृत्तिरिति चेत् ॥
अनुभूयमाने तस्मिन्विपक्षे अपश्यतोयं हेतुर्न स्यात् ॥ ततो ननु भूयमाने तस्मि
न्विपक्षोपलंभसत्तो व्यावृत्तिरिति चेत् । नमेयत्वादीनामगमकत्वप्रसंगात् ॥ अने

कान्तिको प्रसंगात् ॥ अनुमितानुमानोच्छेदप्रसंगाच्च ॥ नयो व्यतिरेकासिद्धिः ॥ विपक्षे
हेतुर्विशेषतो न दूषणमिदमुक्तं ॥ तस्मात्सुवो हेतुरेव ॥ शब्दस्य द्रव्यत्वसाधकप्रमा
णमप्रमाणं । निरवयवेंद्रियग्राह्यत्वं साक्षादिंद्रियसंबंधेन प्रतीयमानत्वं च व्यर्थ
विशेषणमतव्यं ॥ सन्निविच्य । संयोगजादिभेदात् ॥ शब्दत्वं संयोगासमवायिका
रणवृत्ति । शब्दजातित्वात्सत्तावदिति संयोगजशब्दसिद्धिः । शब्दत्वं विभागासमवा
यिकारणवृत्ति शब्दजातित्वात्सत्तावदिति विभागजसिद्धिः ॥ शब्दत्वं गुणत्वव्या
वान्तरजासजातीयारंभवृत्ति । शब्दजातित्वात्सत्तावदिति शब्दजशब्दसि
द्धिः ॥ इति [illegible]पदार्थः ॥ ॥ एवं द्रव्यविभागासमवायिकारणसजातीयकर्म ।

तत्प्रत्यक्षं ग्रा यात् घटवदिति तस्य प्रत्यक्षत्वं सिद्धं ॥ घटकर्म अस्मदादिप्रत्यक्षं गुणा
न्यत्वे सति घट समवेतत्वात् सत्तावदिति ॥ अस्मदादिप्रत्यक्षं यत्सत्तत् क्षणिकं यथा जल
धरः ॥ सत्त्वं श्रामीभावाइति क्षणिकं ॥ तयोः स्थिरस्वभावादारम्भकत्वानुपपत्तिः कर्मण इति चे
त् ॥ न विकल्पानुपपत्तेः ॥ तथाहि ॥ क्षणोद्भवः क्षणिकः तस्य भावः क्षणिकत्वं ॥ द्वितीयक्षणादू
र्ध्वं न तिष्ठतीति क्षणिकः तस्य भावः क्षणिकत्वं ॥ आद्ये विकल्पे न सिद्धसाधनं ॥ स्थायित्व
पक्षेपि तत्संभवात् ॥ न द्वितीयः ॥ व्याप्त्यभावेनानैकान्तिकत्वात् ॥ अथ भावत्वेन व्याप्तिर्ना
स्तीति चेत् ॥ व्याप्यत्वाप्यसत्त्वस्य लक्षणं ॥ क्षणिकत्वे नापि नाभावस्याशक्यग्रह
त्वादभ्युपगतस्यानुमानस्यासंभवप्रसंगात् ॥ अपसिद्धांतप्रसंगाच्च ॥ तस्मात्सत्त्वेन १२

क्षणिकत्वे प्रमाणं ॥ स्थायित्वे तु ॥ विप्रतिपन्नं सर्वं कर्म स्थायि प्रतिक्षणे तद्ग्रहणे सत्त्वात् स
त्वात् संप्रतिपन्नवदिति ॥ इति कर्मपदार्थः ॥ ॥ नित्यमनुगतं सामान्यं ॥ तत्र प्रमाणं प्रत्यक्षं ॥
अथैतत्कल्पनाज्ञानमिति चेत् ॥ कल्पनायास्त्वविकल्पानुपपत्तेः ॥ तथाहि ॥ किं निर्विषय
त्वं कल्पनात्वं किं वा शब्दसंपृक्तार्थप्रतिभासकत्वं ॥ अहोस्वित्स्मरणानंतरभावित्व
मिति ॥ नाद्यः ॥ तस्यापि त्वबाधितविषयत्वात् ॥ नापि द्वितीयः ॥ अर्थे शब्दाभावात् ॥ भावे वा
र्थस्य श्रोत्रपरिच्छेद्यत्वं स्यात् ॥ शब्दस्य वा अश्रोत्रेंद्रियग्राह्यत्वं प्रसज्यते ॥ नात्र तृतीयः ॥
इंद्रियसंनिकर्षानुविधायिनो बोधस्य स्मरणानंतरभावित्वेपि विरोधाभावात् ॥ रू
पस्मरणजननानंतरमुपजातस्य रससाक्षात्कारस्याभ्युपगतप्रामाण्यस्याप्रामा
ण्यप्रसंगाच्च ॥ सामान्यानभ्युपगमे लिंगलिंगिनोरविनाभावस्य दुर्ज्ञानत्वादनु

१४

नुमानस्यानुपस्थितस्यात्॥ समसमध्यजानामनन्तानामुपसं[illegible]काभावात्॥ अथमतंयद्य
पिवस्तुभूतंसामान्यंनास्ति॥ तथाप्यनुगतव्यावृत्ते॥ सामान्यस्यैवधर्मान्तरात् तदुपसंग्रह
दनुमानंप्रवर्ततइति चेत्॥ ॥व्यावृत्तेरवस्तुत्वादुपसंग्राहकत्वाभावात्॥ तस्माद्वस्तु
भूतंसामान्यमङ्गीकर्तव्यं॥ तत्परमपरंच॥ तत्रपरंसत्ता त्रिवर्गानुगतत्वात्॥ तत्रप्रमाणं॥
कर्मत्वावच्छेयसजातीय॥ कार्यत्वाद्द्वाहुल्येयवदिति॥ कार्यगुणकर्मव्यावृत्तजातिमान्
कार्यत्वानुरागवदिति गुणत्वसिद्धिः॥ कर्मगुणव्यावृत्तजातिमत् कार्यत्वाद्देवालयव १५
दितिकर्मत्वसिद्धिः॥ कार्येगुणव्यावृत्तजातिमान् द्रव्यत्वाद्घटोवदिति द्रव्यत्वसिद्धिः॥
विप्रतिपन्नाः पृथिव्यप्तेजोवायवः॥ कार्यव्यावृत्तजातिमन्तः स्पर्शवत्त्वाद्घटो
वदिति॥ पृथिवीत्वादिसिद्धिः॥ आत्मा द्रव्यत्वावान्तरजातिमान् चतुर्दशगु

णवत्त्वादुदकवदिति आत्मत्वसिद्धिः॥ मनो द्रव्यत्वावान्तरजातिमत् नानासमवायिकारणप्रयत्ना
त्॥ आत्मवदिति॥ मनस्त्वसिद्धिः॥ कार्यरूपरसादिव्यावृत्तजातिमत् कार्यत्वात् गोवदिति रूपत्वसि
द्धिः॥ एवंसर्वत्र रसादिष्ववगन्तव्यं॥ उत्क्षेपणादिषु॥ ॥इति सामान्यपदार्थः॥ ॥निःसामान्य
एकैकैव समवायी विशेषः॥ तत्रप्रमाणं॥ मन मनोन्तरव्यावृत्तं निःसामान्यसमवायि द्रव्यत्वाद्गे
वदिति॥ नित्याः आकाशादयो विशेषवन्तः॥ नित्यद्रव्यत्वान्मनोवदिति॥ स नित्यः सत्वे सति जा
ति शून्यत्वात् सत्तावदिति॥ ॥इति विशेषपदार्थः॥ ॥नित्यः संबंधः समवायः॥ सत्तास
बंधो निवर्तते जातित्वाद्घटत्वदिति॥ तत्रप्रमाणं॥ समवायोस्मदादिप्रत्यक्षः॥ परमाणुसं
बंधत्वात्संयोगवदिति॥ नित्यः सत्वे सत्यसंभवे नत्वात्परमाणुवत्॥ विवादमापन्नाः सम
वायप्रत्ययाः [illegible]भेदत्वसमवायप्रत्यये नाभिन्नविषयाः समवायप्रत्ययत्वात् संप्रतिपन्न

१५

समवयप्रत्ययवदिति। समवायेकत्वसिद्धिः। ।इतिसमवायपदार्थः। ।भावनिषेधोभावः।
सद्वेधा। अन्योऽन्यश्चेति। प्रथमः प्रध्वंसः। उत्तरोद्वेधा। विनाशीऽन्यथा चेति। आद्यः प्राग
भावः। उत्तरोद्वेधा। समानाधिकरणनिषेधोऽन्यथा चेति। पूर्वे इतरेतराभावः। उत्तरोऽत्यंताभा
वः। नात्रप्राभाकरवत्प्रमाणमभिधानीयं। निद्रामरणनिर्वाणांगीकरणात्। धिषणानिर्वा
णं हि निद्रा। उपनिबंधकादृष्टक्षयात्। कलेवरविलयोमरणं। निशेषात्मविशेषगुणविलयो
निर्वाणं। अथकथयसित्वं। द्रव्येप्रतियोगिनिज्ञायमानेकेवलाधिकरणोपलंभः एवनि
द्रादिरिति। मैवंवोचः। विकल्पानुपपत्तेः। द्रव्यस्यप्रतियोगिनोविज्ञानंकिंसुप्तस्यकिंवायस्य
कस्यचित्। आद्येविकल्पेसुप्तःप्रबुद्धःस्यात्। नद्वितीयः। परनरगतसंवित्तेः परनरेणाप्रत्य
क्षेणज्ञातुमशक्यत्वात्। परस्ययथाकथंचित्तरच ज्ञानमस्तीति चेत्। नपरमाणुगुणानाप
भावकथंचिदवगतानांनिषेधप्रसंगात्। तस्मादभावोऽंगीकर्तव्यः। तच्चापिमोक्षेप्रमाणं। आ

त्माकदाचिदशेषविशेषगुणशून्यः अनित्यविशेषगुणवत्त्वात्पार्थिवपरमाणुवदिति। नाका
शेव्यभिचारः। तस्यापितथासाधनात्। ।इतितार्किकचक्रचूडामणिविरचितायांप्रमाणमं
जर्यामभावांतायथदार्थाःसमाप्ताः।

१६

```
[OrderDescription]
,CREATED=22.10.20 11:47
,TRANSFERRED=2020/10/22 at 11:49:46
,PAGES=16
,TYPE=STD
,NAME=S0004363
,Book Name=M-820-PRAMAN MANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,
```